# 13. दिष्ट्या गोग्रहणं स्वन्तम्

[This excerpt has been taken from Mahakavi Bhasa's 3-Act play 'Pancharatram'. In the composition of this play, Bhasa has dismissed the destructive war of the Mahabharata. When the period of the Pandavas being incognita is about to get over, Duryodhan performs a 'Yajna'. The 'Acharya' at this Yajna is guru Drona. As 'dakshina', Drona asks Duryodhana to give half the kingdom to the Pandavas. Duryodhana does not accept this but Shakuni makes him accept it with a condition. The condition is that the Pandavas should be traced in 5 days.

In this background, on the advice of Bhishma the Kauravas lead their army against the city of Virata and carry away their cows. In order to stop this stealing of the cows, Bhima disguised as Ballava and Arjuna as Brihannala help the Virat king and successfully drive out the Kauravas. They also get hold of Abhimanyu.

An edited version of what takes place at the court of the Virata king is presented here. Abhimanyu cannot recognize his father and uncle who are in disguise . The attempts of both the elders to tease Abhimanyu through this conversation is really humorous. This conversation will really entertain each one in the audience.

With Abhimanyu as the cause, the Virata king also comes to know of the true identity of the Pandavas. As Pandavas have been traced within five nights Duryodhana as advised by Drona gives half the kingdom. In this way, war is averted.

As all these events take place within five nights, the play has the title 'Pancharatram'.]

---

(प्रविश्य)

भटः : जयतु महाराजः । प्रियं निवेदये महाराजाय । अवजितं गोग्रहणम् । अपयाताः धार्तराष्ट्राः ।

राजा : अपूर्व इव ते हर्षः । ब्रूहि केनासि विस्मितः ।

भटः : अश्रद्धेयं प्रियं प्राप्तं सौभद्रो ग्रहणं गतः ।

राजा : कथमिदानीं गृहीतः ?

भटः : रथमासाद्य निःशङ्कं बाहुभ्यामवतारितः ।

राजा : केन ।

भटः : यः किलैष नरेन्द्रेण महानसे विनियुक्तो बल्लवः, तेन ।

राजा : तेन हि सत्कृत्य प्रवेश्यताम् अभिमन्युः । बृहन्नले, प्रवेश्यताम् अभिमन्युः ।

बृहन्नला : यदाज्ञापयति महाराजः । (निष्क्रान्ता ।)

(ततः प्रविशति अभिमन्युः बृहन्नला बल्लवः च ।)

बृहन्नला : इतः इतः कुमार । अभिमन्यो ।

अभिमन्युः : अभिमन्युर्नाम । कथं कथम् । अभिमन्युः नामाहम् । भोः किं नामभिः अभिभाष्यन्ते क्षत्रियाः अत्र ।

बृहन्नला : अभिमन्यो, सुखम् आस्ते ते जननी ?

अभिमन्युः : कथं कथम् । जननी नाम ।

**किं भवान् धर्मराजो मे भीमसेनो धनञ्जयः ।**

**यन्मां पितृवदाक्रम्य स्त्रीगतां पृच्छसे कथाम् ।।**

बृहन्नला : अभिमन्यो, अपि कुशली देवकीपुत्रः केशवः ।

अभिमन्युः : कथं तत्रभवन्तम् अपि नाम्ना । अथ किम् । अथ किम् । कुशली भवतः संसृष्टः ।

(उभौ परस्परम् अवलोकयतः ।)

अभिमन्युः : कथम् इदानीं सावज्ञम् इव मां हस्यते ?

बृहन्नला : न खलु किञ्चित् । त्वं तु पार्थपुत्रः । जनार्दनः तव मातुलः । त्वं च तरुणः । तथापि तेन पदातिना गृहीतः ।

अभिमन्युः : अलं स्वच्छन्दप्रलापेन । अस्माकं कुले आत्मश्लाघा उचिता नास्ति । रणभूमौ हतेषु शरान् पश्य । मां विना नामान्तरं न भविष्यति ।

बृहन्नला : (आत्मगतम्) सम्यक् आह कुमारः । (प्रकाशम्) एवं वाक्यशौण्डीर्यम् । किमर्थं तेन पदातिना गृहीतः ?



अभिमन्युः : अशस्त्रो मामभिगतस्ततोऽस्मि ग्रहणं गतः ।

राजा : त्वर्यतां त्वर्यताम् अभिमन्युः ।

बृहन्नला : इतः इतः कुमार । एषः महाराजः । उपसर्पतु कुमारः ।

अभिमन्युः : आः कस्य महाराजः ।

बृहन्नला : न, न, ब्राह्मणेन सहास्ते ।

अभिमन्युः : ब्राह्मणेनेति । (उपगम्य) भगवन् अभिवादये ।

भगवान् : एहि एहि वत्स ।

अभिमन्युः : अनुगृहीतः अस्मि ।

राजा : एहि एहि पुत्र ! (आत्मगतम्) कथं मां नाभिवादयति ? अहो उत्सिक्तः खलु अयं क्षत्रियकुमारः । अहमस्य दर्पप्रशमनं करोमि । (प्रकाशम्) अथ केनायं गृहीतः ?

भीमसेनः : महाराज मया बल्लवेन ।

अभिमन्युः : अशस्त्रेण इति कथ्यताम् ।

भीमसेनः : शान्तं पापम् । सहजौ मे प्रहरणं भुजौ । धनुः तु दुर्बलैः गृह्यते ।

अभिमन्युः : किं भवान् मम मध्यमः तातः, यः तत्तुल्यं वदति ।

राजा : पुत्र ! कः अयं मध्यमः नाम ।

अभिमन्युः : श्रूयताम् । यः खलु जरासन्धं पञ्चत्वम् अनयत् सः ।

(ततः प्रविशति उत्तरः ।)

उत्तरः : तात । अभिवादये ।

राजा : आयुष्मान् भव पुत्र । अपि पूजिताः कृतकर्माणः योधाः ।

उत्तरः : पूजिताः । पूज्यतमस्य क्रियतां पूजा ।

राजा : पुत्र, कस्य ।

उत्तरः : इहात्रभवतः धनञ्जयस्य ।

राजा : कथं धनञ्जयस्य इति ।

उत्तरः : अथ किम् । अत्रभवता श्मशानात् निजधनुः तूणी चाक्षयसायके चादाय भीष्मादयः नृपाः भग्नाः वयं च परिरक्षिताः ।

राजा : एवम् एतत् ?

बृहन्नला : प्रसीदतु प्रसीदतु महाराजः ।

उत्तरः : व्यपनयतु शङ्काम् । अयम् एव धनुर्धरः धनञ्जयः ।

बृहन्नला : यदि अहम् अर्जुनः तर्हि अयं भीमसेनः । अयं च राजा युधिष्ठिरः ।

अभिमन्युः : इह अत्रभवन्तः मे पितरः । तेन खलु –

**न रुष्यन्ति मया क्षिप्ता हसन्तश्च क्षिपन्ति माम् ।**
**दिष्ट्या गोग्रहणं स्वन्तं पितरो येन दर्शिताः ॥**

(इति क्रमेण सर्वान् प्रणमति । सर्वे तस्मै आशीर्वादान् वदन्ति ।)

## Glossary

**Noun : (masc.) : भटः** a soldier **विराटेश्वरः** king of Virata **धार्तराष्ट्रः** son of Dhritarashtra, Kaurava **बल्लवः** name of Bhima, who stayed in Viratanagar as a cook during incognito **महानसः** kitchen **उत्तरः** prince Uttara, son of king of Virata **धर्मराजः** Yudhishthira **मातुलः** maternal uncle **शरः** an arrow **पदातिः** pedestrian **योधः** a soldier, warrior **धनञ्जयः** Arjuna **भुजः** arm **क्षेपः** insult

**(Fem.) : बृहन्नला** name of Arjuna, as a dancer when incognito in Viratnagar

**(Neu.) : गोग्रहणम्** taking away of cows **वाक्यशौण्डीर्यम्** expertise only in speech **प्रहरणम्** weapon

**Adjective : अश्रद्धेय** not trustworthy **स्त्रीगत** related to woman (lady) **संसृष्ट** relative, connected to **उत्सिक्त** proud, impudent **कृतकर्मा** one who has done work worthy of notice **पूज्यतम** most respectable **स्वन्त** (सु + अन्त) having happy ending.

**Compound :** विराटेश्वरः (विराटानाम् ईश्वरः विराटेश्वरः, षष्ठी तत्पुरुष) । गोग्रहणम् (गवां ग्रहणम् गोग्रहणम् । षष्ठी तत्पुरुष) । नरेन्द्रेण (नरेषु इन्द्रः नरेन्द्रः, तेन । सप्तमी तत्पुरुष) । देवकीपुत्रः (देवक्याः पुत्रः देवकीपुत्रः । षष्ठी तत्पुरुष) । युद्धपराजयः (युद्धे पराजयः युद्धपराजयः । सप्तमी तत्पुरुष) । आत्मश्लाघा (आत्मनः श्लाघा आत्मश्लाघा, षष्ठी तत्पुरुष) रणभूमौ (रणस्य भूमिः रणभूमिः, तस्याम् । षष्ठी तत्पुरुष) । वाक्यशौण्डीर्यम् (वाक्येषु शौण्डीर्यम् वाक्यशौण्डीर्यम् । सप्तमी तत्पुरुष) । दर्पप्रशमनम् (दर्पस्य प्रशमनम् दर्पप्रशमनम् । षष्ठी तत्पुरुष) । तत्तुल्यम् (तेन तुल्यम् तत्तुल्यम् । तृतीया तत्पुरुष) । कण्ठश्लिष्टेन (कण्ठे श्लिष्टः कण्ठश्लिष्टः, तेन । सप्तमी तत्पुरुष) ।

**Root : (First Gana)** (Parasmaipada) **नी** (**नयति**) to take, to lead

(Atmanepada) **रम्** (**रमते**) to play, to be glad

**Fourth Gana** (Parasmaipada) **रुष्** (**रुष्यति**) to be angry

**Sixth Gana** (Prasamaipada) **प्रच्छ्** (**पृच्छति**) to ask, to ask a question (Here, this root is used in Atmanepada as exceptional-पृच्छसे) **क्षिप्** (**क्षिपति**) to throw

**Tenth Gana :** (Parasmaipada) **अव + लोक्** (**अवलोकयति**) to see, to observe

(Atmanepada) **नि + विद्** (**निवेदयते**) to report **अभि + वद्** (**अभिवादयते**) to greet, to bow to

## Notes

**(1) Meaning : जयतु** be victorious **अवजितम्** won, conquered **अपयाताः** have run away **निःशङ्कम्** doubtlessly, without doubt or fear **विनियुक्तः** appointed **सत्कृत्य** welcoming, receiving **प्रवेश्यताम्** make him enter **नामभिः** by name **अभिभाष्यन्ते** are called **पितृवत्** like elder, like father **आक्रम्य** having attacked **कथाम्** story **सावज्ञम्** disrespectfully, mockingly **हस्यते** is laughed at **अलं स्वच्छन्दप्रलापेन** stop nonsensical talk, do not speak what you like **आत्मश्लाघा** self praise **पदातिना** by a foot-soldier **अशस्त्रः** one without weapon **अभिगतः** is approached

**त्वर्यताम्** hurry up, bring (him) soon **उत्सिक्तः** proud, haughty **दर्पप्रशमनम्** claming down, control of anger **कथ्यताम्** say, tell **शान्तं पापम्** oh, no ! how can it be. (This phrase is used in Sanskrit language to calm down an angry person or disturbance as in Gujarat 'stop now stop') **सहजौ** natural, born together (dual) **निजधनुः** one's own bow **तूणी अक्षयसायके** two quivers having innumerable arrows **आदाय** taking **भग्नाः** run away **परिरक्षिताः** saved **प्रसीदतु** be pleased **व्यपनयतु** get rid of **क्षिप्ताः** those who are blamed **हसन्तः** smiling **दिष्ट्या** fortunately, luckily **गोग्रहणम्** catching of cows, kidnapping of cows **स्वन्तम्** having good (happy) ending (सु-अन्तम्).

**(2) Sandhi :** अपूर्व इव ते हर्षो ब्रूहि केनासि (अपूर्वः इव ते हर्षः ब्रूहि केन असि) । सौभद्रो ग्रहणम् (सौभद्रः ग्रहणम्) । किलैषः (किल एषः) । उत्तरेणाद्य (उत्तरेण अद्य) । यन्मां पितृवदाक्रम्य (यत् मां पितृवत् आक्रम्य) । अशस्त्रो मामभिगतस्ततोऽहम् (अशस्त्रः माम् अभिगतः ततः अहम्) । चाक्षयसायके (च अक्षयसायके) । चादाय (च आदाय) ।

## Exercises

**1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) ब्रूहि केनासि विस्मितः । इति वचनं कस्य ? ◯

(क) भटस्य (ख) विराटेश्वरस्य (ग) उत्तरस्य (घ) बृहन्नलायाः

(2) नरेन्द्रेण महानसे कः विनियुक्तः ? ◯

(क) बल्लवः (ख) अर्जुनः (ग) भटः (घ) उत्तरः

(3) कथमिदानीम् .............. इव मां हस्यते ? ◯

(क) अनभिज्ञम् (ख) सावज्ञम् (ग) अपरिचितम् (घ) निरवज्ञम्

(4) धनुः कैः गृह्यते ? ◯

(क) दुर्बलैः (ख) सैनिकैः (ग) राक्षसैः (घ) योधैः

(5) पितरः केन दर्शिताः ? ◯

(क) गोग्रहणेन (ख) उत्तरेण (ग) बल्लवेन (घ) भटेन

**2. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत ।**

(1) भटः किं प्रियं निवेदयति ?

(2) अभिमन्युः केन गृहीतः ?

(3) बृहन्नला कस्य कस्य विषये अभिमन्युं पृच्छति ?

(4) भीमसेनस्य सहजं प्रहरणं किम् अस्ति ?

(5) उत्तरः कस्य पूजां कर्तुं कथयति ?

**3. निम्नलिखितेषु वाक्येषु कः भावः प्रकटितः तत्प्रकोष्ठगतेभ्यः शब्देभ्यः विचित्य लिखत ।**

(1) कथं कथम् । अभिमन्युः नाम अहम् । (आत्मप्रशस्तिः, दैन्यम्, अभिमानः)

(2) यन्मां पितृवदाक्रम्य स्त्रीगतां पृच्छसे कथाम् । (क्रोधः, विस्मयः, तिरस्कारः)

(3) धनुस्तु दुर्बलैः गृह्यते । (उत्साहः, शौर्यम्, अहङ्कारः)

(4) दिष्ट्या गोग्रहणं स्वन्तं पितरो येन दर्शिताः । (हर्षः, धैर्यम्, निन्दा)

**4. अधोलिखितानां धातुरूपाणां धातु-गण-पद-काल/लकार-पुरुष-वचननिर्देशकपूर्वकं परिचयं कारयत ।**

(1) रुष्यन्ति ............... ............... ............... ............... ...............

(2) वदति ............... ............... ............... ............... ...............

(3) पृच्छसे ............... ............... ............... ............... ...............

(4) भविष्यति ............... ............... ............... ............... ...............

(5) प्रविशति ............... ............... ............... ............... ...............

**5. मातृभाषायाम् उत्तराणि लिखत ।**

(1) What news does Bhata convey to the king ?

(2) What is the reaction of Abhimanyu, when asked about his mother ?

(3) What is Bhima's opinion about a weapon ?

(4) What did Dhananjaya do ?

(5) How was Abhimanyu benefitted by the incident Gograhanam ?

**6. क-विभागं ख-विभागेन सह संयोजयत ।**

| क | ख |
|---|---|
| (1) अश्रद्धेयं प्रियं प्राप्तं सौभद्रो ग्रहणं गतः । | (1) अभिमन्युः |
| (2) पूज्यतमस्य क्रियतां पूजा । | (2) भटः |
| (3) अशस्त्रेण इति कथ्यताम् । | (3) बृहन्नला |
| (4) सुखमास्ते ते जननी । | (4) भगवान् |
| (5) एहि एहि वत्स । | (5) उत्तरः |
| | (6) बल्लवः |

**Activity**

- Write the names of thirteen plays of Bhasa.
- Read the plot of पञ्चरात्रम्.

•